# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19R**

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२४**

**सत्र ५ वे**

**विषयः रत्नावली** (19R458)

| दिनांक :२४/०५/२०२४ | गुण : ६० | वेळ : दु. २.०० ते दु. ४.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. मातृभाषया चतुर्णामनुवादः करणीयः।** **(२८)**

१) राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः।।

२) कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।
दत्तातङ्कोऽङ्गनानामनुसृतसरणिः सम्भ्रमादश्वपालैः।
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः।।

३) मूले गण्डूषसेकासव इव बकुलैर्वास्यते पुष्पवृष्ट्या मध्वाताम्रे तरुण्या मुखशशिनि चिराच्चम्पकान्यद्य भान्ति।
आकर्ण्याशोकपादाहतिषु च रसितं निर्भरं नूपुराणां झङ्कारस्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः।।

४) परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति नलिनीपत्रशयनम्।

५) समारूढा प्रीतिः प्रणयबहुमानमनुदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति।।

६) भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता मीषन् मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः।।

**प्र.२. ससन्दर्भं त्रयाणां स्पष्टीकरणं लिखत ।** **(१८)**

१. लोके हारि च वत्सराजचरितम्।

२. दर्शितं खलु मेधाविन्यात्मनो मेधावित्वम्।

३. पृथ्वी खल्विदानीं हस्तगता प्रियवयस्य।

४. अहो प्रमादः परिजनस्य।

५. न कमलाकरमुज्झित्वा राजहंस्यन्यत्राभिरमते।

६. सखे इयमनभ्रा वृष्टिः।

**प्र.३. टिप्पणीद्वयं लिखत।** **(१४)**

१. लावाणकः

२. वसंतोत्सवम्

३. प्रस्तावना

४. वसन्तकः

----------